लक्ष्यः । भूमानं भगवो विजिज्ञासे” छा० उ० । “यो वै भूमा महत् निरतिशयम् बह्विति पर्य्यायास्तत् सुखं ततोऽर्वाक् सातिशयत्वादल्पम् । अतस्तस्मिन्नल्पे सुखं नास्ति अल्पानां तृष्णाहेतुत्वात् तृष्णा च दुःखबीजम् । न हि दुःखबीजं ज्वरादि सुखं दृष्टं लोके । तस्माद्युक्तं नाल्पे सुखमस्तीति । अतो भूमैव सुखम् तृष्णादिदुःखबीजत्वासम्भवाद्भूम्नः” भाष्यम् तस्मिन् प्रपाठके च यस्मात् यो भूमा तन्निरूपितं दृश्यम् ।

**भूमय** त्रि० भू+मयट् । १मृदात्मके २छायायां त्रिका० स्त्री ङीप् ।

**भूमि(मी)** स्त्री भवन्त्यस्मिन् भूतानि भू—मि किच्च वा ङीप् । १पृथिव्याम् २स्थानमात्रे मेदि० ३जिह्वायां शब्दर० उणा० योगशास्त्रोक्ते ४योगिनां चित्तस्यावस्थाभेदे, ५एकसंख्यायाञ्च । पाण्डुभूम्यादितोऽच् समा० बहु० । द्विभूमः प्रसादः पाण्डुभूमो देशः । योगोक्तभूमयश्च “तस्य भूमिषु विनियोगः” पा० सू० उक्ताः । “तस्य संयमस्य जितभूमेर्याऽनन्तरा भूमिस्तत्र विनियोगः । नह्यजिताधरभूमिरनन्तरभूमिं विलङ्घ्य प्रान्तभूमिषु संयमं लभते तदभावाच्च कुतः तस्य प्रज्ञालोकः, ईश्वरप्रसादाज्जितोत्तरभूमिकस्य च नाधरभूमिषु परचित्तज्ञानादिसंयमो युक्तः कस्मात् तदर्थस्यान्यत एवावगतत्वात् भूमेरस्या इयमनन्तरा भूमिः” भा० । सा च भूमिः सप्तप्रकारा यथोक्तं तत्रैव “तस्य सप्तधा प्रान्तभूमिः प्रज्ञा” पात० सू० । “तस्येति प्रत्युदितख्यातेः प्रत्याम्नायः सप्तधेति अशुद्ध्यावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति । तद्यथा परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्ति क्षीणा हेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति साक्षात्कृतं निरोधसमाधिना हानम् । भावितो विवेकख्यातिरूपो हानोपाय इत्येषा चतुष्टयी कार्य्या विमुक्तिः प्रज्ञायाः । चित्तविमुक्तिस्तु त्रयी चरिताधिकारा बुद्धिगुणा गिरिशिखरकूटच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति । न चैषां विप्रलीनानां पुनरस्त्युत्पादः प्रयोजनाभावादिति एतस्यामवस्थायां गुणसम्बन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इत्येतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कुशल इत्याख्यायते प्रतिप्रसवेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति सिद्धा भवति विवेकख्यातिर्हानोपायः इति” भा० । “प्रत्युदितख्यातेः वर्त्तमानख्यातेः योगिनः प्रत्याम्नायः परामर्शः अशुद्धिरेवावरणं क्लिष्टसत्त्वस्य तदेव मलं तस्यापगमात् चित्तस्य प्रत्ययान्तरानुत्पादे तामसराजसव्युत्थानप्रत्ययानुत्पादे निर्विप्लवविवेकख्यातिनिष्ठामापन्नस्य सप्तप्रकारैव प्रज्ञा विवेकिनो भवति विषयभेदात् प्रज्ञाभेदः प्रकृष्टोऽन्तो यासां भूमीनामवस्थानां तास्तथोक्ता यतः परं नास्ति संप्रकर्षः प्रान्ता भूमयः यस्याः प्रज्ञाया विवेकख्यातेः सा तथोक्ता ता एव सप्तप्रकाराः प्रज्ञाः भूमीः उदाहरति । तद्यथेति तत्र पुरुषप्रयत्ननिष्पाद्यास्तु चतसृषु भूमिषु प्रथमामुदाहरति परिज्ञातं हेयं यावत् किल प्राधानिकं तत् सर्वं परिणामतापसंस्कारैर्गुणवृत्तिविरोधात् दुःखमेवेति हेयं तत् परिज्ञातम् । प्रान्ततां दर्शयति नास्य पुनः किञ्चित् परिज्ञातं परिज्ञेयमस्ति । द्वितीयामाह क्षीणा इति । प्रान्ततामाह न पुनरिति । तृतीयामाह साक्षात्कृतं प्रत्यक्षेण निश्चितं यथा संप्रज्ञातावस्थायामेव निरोध० समाधिसाध्यं हानं न पुनरस्मात् परं निसेतव्यमस्तीति शेषः । चतुर्थीमाह भावितो मिथ्यादितः विवेकख्यातिरूपो हानोपायो नास्याः परं भावनीयमस्ति इति शेषः । एषा चतुष्टयी कार्य्यविमुक्तिरिति कार्य्यान्तरेण विमुक्तिः प्रज्ञाया इत्यर्थः प्रयत्ननिष्पाद्यास्तूक्ताऽनिष्पादनीयामप्रयत्नसाध्यां चित्तविमुक्तिमाह चित्तविमुक्तिस्तु त्रयी । तत्र प्रथमामाह चरिताधिकारा बुद्धिकृतभोगापवर्गकार्य्येत्यर्थः। द्वितीयामाह गुणा इति प्रान्ततामाह न चैषामिति । तृतीयामाह एतस्यामवस्थायामिति तस्यामवस्थायां जीवन्नेव पुरुषः कुशलो मुक्त इत्युच्यते चरमदेहत्वादित्याह एतामिति । अनौपचारिकं मुक्तमाह प्रतिप्रसवे प्रधानलयेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति” विवरणम् ।

पृथिवीरूपभूमिगुणाश्च भा०प्रा० उक्ता यथा “भूमेः स्थैर्य्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता । गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः” । प्रथमगुरुत्वं पतनविरोधी गुणः द्वितीयगुरुत्वम् पिण्डपुष्टिरतो न पौनरुक्त्यम् । शक्तिः धारणादिसामर्थ्यम् संघातः संश्लिष्टावयवत्वम् । स्थापना मनुष्यादिधारणानुकूलव्यापारः । धृतिर्धारणा इत्यर्थः ।

**भूमिकदम्ब** पु० भूमिजातः कदम्बः शा० त० । कदम्बभेदे “त्रिकदम्बाः कटूष्णाश्च हृद्या दोषहरा हिमाः । कषाय